

श्रा०
१

ॐ श्रीगणेशाय नमः श्रीभैरवाय नमः
ॐ मेरुपृष्ठे सुखासीनं देवदेवं त्रिलोचनं
शंकरं परिपप्रच्छ पार्वती परमेश्वरम् १ श्री
पार्वत्युवाच भगवन्सर्वधर्मज्ञ सर्वशास्त्रा
गमादिषु आपदुद्धारणं मंत्रं सर्वसिद्धिप्रदं
नृणां सर्वेषां चैव भूतानां हितार्थं वांछितं म
या विशेषतस्तु राज्ञां वै शांतिपुष्टिप्रदायकं ३
अंगन्यासकरन्यासदेहन्याससमन्वितं व
क्तुमर्हसि देवेश मम हर्षप्रवर्धनम् ४ ईश्व

रउवाच शृणु देवि महामंत्रं आपदुद्धारहेतु
कं सर्वदुःखप्रशमनं सर्वशत्रुविनाशनम्
अपस्मारादिरोगाणां ज्वरादीनां विशेषतः
सर्वेषां स्मृतिमात्रेण मंत्रराजमिमं प्रिये ६
ग्रहरोगभयानां च नाशनं सुखवर्धनं स्नेहा
द्वक्ष्यामि ते मंत्रं राज्यभोगप्रदं नृणां सर्वका
मार्थदं मंत्रं प्रवक्ष्यामि विशेषतः आपदुद्धार
यन्मंत्रं प्रवक्ष्यामि विशेषतः प्रणवं पूर्वमुद्धृ
त्य देवी प्रणवमुच्यते ७ वटुकायेति वै पश्चादा

५

श्री० पञ्चद्वाराणायच कुरुद्वयं ततः पश्चात्वटुका
२ यञ्चतः क्षिपेत् ॥९॥ देवीप्रणावसहृत्पमंत्रोद्धार
2 मिमं प्रिये मंत्रोद्धारमिमं देवि त्रैलोक्यस्यापि
दुर्लभम् ॥१०॥ अप्रकाश्यं परं गुह्यं सर्वशक्तिस
मन्वितम् स्मरणादेव मंत्रस्य भूतप्रेतपिशा
चकाः विद्रवंत्यतिभीताश्च कालरुद्रादिव प्र
जाः ॥११॥ पठेद्वा पाठयेद्वापि पूजयेद्वापि पुस्तक
म् नाग्निचौरभयं तत्र ग्रहराजभयं तथा न च
मारीभयं किंचित् सर्वत्र सुखमाप्नुयात् श्री

दुरारोगायैमैश्वर्यंपुत्रपौत्रादिसंपदम् ९३ भवंति
मंत्रतंत्रस्यपुस्तकस्यापिपूजनात् नदारिद्र्यन
दौर्भाग्यंनापदांभयमेवच पार्वत्युवाच कएष
भैरवोनामग्रापदुद्धारणोमतः ९४ त्वयाचकथि
तोदेवभैरवःकल्पउत्तमः तस्यनामसहस्राणि
अयुतान्यर्बुदानिच ९५ सारमुद्धृत्यतेषांवै
नामाष्टशतकंवद यानिसंकीर्तयन्मर्त्यःसर्व
दुःखविवर्जितः ९६ सर्वान्कामानवाप्नोति
साधकःसिद्धिमेवच श्रीशंकरउवाच ९७

भै० णुदेविप्रवक्ष्यामिभैरवस्यमहात्मनः १७ आ
३ पदुद्धारणस्येहनामाष्टशतमुत्तमम् सर्वपा
3 पहरंपुण्यंसर्वापद्विनिवारणम् सर्वकामा
र्थदंदेविसाधकानांसुखावहम् १८ नामाष्ट
शतकस्यास्यछंदोनुष्टुप्प्रकीर्तितम् बृह
दारण्यकोनामऋषिर्देवोथभैरवम् १९ ॐअ
स्यश्रीआपदुद्धारवटुकभैरवस्तोत्रमंत्रस्य
बृहदारण्यकऋषिरनुष्टुप्छंदोभैरवोदेव
ता ह्रींबीजंवटुकायेतिशक्तिः प्रणवःकी

अथ न्यासः
लकं अभीष्टसिद्ध्यर्थे जपे विनियोगः हृद्दा
रुणपकोनाम ऋषये नमः शिरसि अनुष्टुप्
छंदसे नमो मुखे भैरवो देवताये नमः हृदि
ह्रीं बीजाय नमो [illegible] वटुकाय शक्तये नमो पादयोः
ॐ कीलकाय नमः [illegible] ममाऽभी
ककाममोक्षार्थे जपे विनियोगः सर्वांगेषु
अथ करन्यासः ह्रां वां अंगुष्ठाभ्यां नमः ह्रीं वीं
तर्जनीभ्यां स्वाहा ह्रूं वूं मध्यमाभ्यां वौषट् ह्रैं
वैं अनामिकाभ्यां हुं ह्रौं वौं कनिष्ठकाभ्यां

श्री॰
४

वौषट् ह्रः॥ करतलकरपृष्ठाभ्यां फट् इत्ये
वं हृदयादिन्यासः लज्जाबीजं बीजमिति व
द्दकाद्येति शक्तिकं प्रणवं कीलकं प्रोक्तमष्ट
सिद्धौ नियोजयेत् भैरवं मूर्ध्नि विन्यस्य लला
टे भीमदर्शनं नेत्रयोर्भूतसहन्तं सारमेयानु
गं भ्रुवोः कर्णयोर्भूतनाथं च प्रेतवाहं कपो
लयोः नासापुटोष्टयोश्चैव भस्मांगं सर्पभू
षणं अनादिनाथमास्येह शक्तिहस्तं गले
न्यसेत् स्कंधयोर्दैत्यशमनं वाद्यौ रत्नलते

ज्ञसं पाणिपोः कपालिनं न्यसेत् हृदये
मुंडमालिनं शांतं वक्षस्थले न्यसे स्त
नयोः कामचारिणं उदरे च सदा तुष्टं क्षे
त्रज्ञं पार्श्वयोस्तथा क्षेत्रपालं पृष्ठदेशे
क्षेत्रज्ञं नाभिदेशके पापौघनाशनं क
ट्यां वटुकं लिंगदेशके गुदे रत्नाक
रं न्यसेत् तथा वीरं रक्तलोचनम् जान्वो
र्हुहुंरारावं जंघयो रक्तपायिनम् गु
ल्फयोः पादुकासिद्धं पादपृष्ठे सुरेश्व

श्रा० र आपादमस्तकंचैव आपञ्चद्वाराणिन्य
५ सेत् पूर्वेडमरुहस्तंच दक्षिणेदंडधा
5 रिणं खड्गहस्तंपश्चिमायां घंटावाह
नमुत्तरे आग्नेयामग्निवर्णंच नैरृत्यां
चदिगंबरम् वायव्यांसर्वभूतास्य मी
शानेशूलधारिणं ऊर्ध्वेविचारिणंन्य
स्य पातालेशिवरूपिणं ३७ एवंवि
न्यस्यदेहेषु षडंगेचततोन्यसेत् हृ
दयेभूतनाथाय आदिनाथायनम्

ईति आनंदपरमेश्वराय नाथायाय
शिवास्तच सिद्धशावरनाथाय कवचे
विन्यसेत्तथा सहजानंदनाथाय अस्त्रे
चैव प्रयोजयेत् एवंन्यासविधिं कृत्वा
यथावत्तदनंतरं तस्यध्यानंप्रवक्ष्यामि
यथाध्यानात्पठेन्नरः शुद्धस्फटिकसं
काशं सहस्रादित्यवर्चसम् नीलजी
मूतसंकाशं नीलांजनसमप्रभं

ग्रा॰ ६ अष्टबाहुं त्रिनयनं चतुर्बाहुं द्विबाहु
कं दंष्ट्राकरालवदनं नूपुरारावसं
6 कुलम् भुजंगमेखलं देव मग्निव
र्णंशिरोरुहं दिगंबरंकुमारीशं बटु
काख्यमहाबलं खट्वांगमसिपाशंच
शूलंचैवतथापुनः डमरुंचकपालं
च वरदंभुजगंतथा ५॰ अग्निवर्ण
समोपेतंसारमेयसमन्वितं ध्या

त्वाजपेत्स्संसृष्टः सर्वान् कामानवा
प्नुयात् ॥ करकलितकपालः कुंडलीदं
डपाणि स्तरुणतिमिरनीलो व्यालय
ज्ञोपवीतिः क्रतुसमयसपर्याविघ्नवि
च्छेदहेतुर्जयतिवटुकनाथः सिद्धिदः
साधकानां ॥ ॐ भैरवो भूतनाथश्च भू
तात्मा भूतभावनः क्षेत्रज्ञः क्षेत्रपा
लश्च क्षेत्रदः क्षत्रियो विराट् स्मशा

ॐ

आ· ८

नवासीमांसासीखर्परासीस्मरांतकृत्
रक्तपः पानपः सिद्धः सिद्धिदः सिद्धसेवितः
कंकालः कालसमनः कलाकाष्ठातनुः क
विः त्रिनेत्रो बहुनेत्रस्तथा पिंगललोचनः
शूलपाणिः खड्गपाणिः कंकाली धूम्रलोच
नः अभीरुर्भैरवीनाथो भूतपो योगिनीपतिः
धनदो धनहारी च धनवान्प्रतिभानवान्
नागहारो नागपाशो व्योमकेशः कपालभृत्

कालः कपालमाली च कमनीयः कलानिधिः
त्रिनेत्रोज्वलनेत्रश्च त्रिशिखी च त्रिलोकपः
त्रिनेत्रस्तपनो डिंभः शांतः शांतजनः प्रियः
वटको वटवेषश्च खट्वांगवरदायकः भूता
ध्यक्षः पशुपतिर्भिल्वकः परिचारकः धू
र्तो दिगंबरः शौरिर्हरिणः पांडुलोचनः प्र
शांतः शांतिदः सिद्धः शंकरप्रियबांधवः
अष्टमूर्तिर्निधीशश्च ज्ञानचक्षुस्तपोमयः अ
ष्टाधारः षडाधारः सर्पयुक्तः शिखीसखः

भ्रा- ८

भूधरो भूधराधीशो भूपतिर्भूधरात्मजः कं
कालधारी मुंडी च नागयज्ञोपवीतकः जृंभ
णो मोहनः स्तंभी मारणः क्षोभणस्तथा शुद्धो
नीलांजनः प्रख्यो दैत्यहा मुंडभूषितः वलि
भुग्वलिभुङ्नाथो वालो वालपराक्रमः स
र्वापत्तारणो दुर्गो दुष्टभूतनिषेवितः कामी
कलानिधिः कांतः कामिनीवशकृद्वशी सर्व
सिद्धिप्रदो वैद्यः प्रभुर्विस्नरितिवहि ॥ अष्टोत्त
रशतं नाम्नां भैरवस्य महात्मनः मयाते क

थितं देवि रहस्यं सर्वकामदं यइदं पठते
स्तोत्रं नामाष्टशतमुत्तमं न तस्य दुरितं किं
चिन्न रोगाणां भयं तथा न शत्रुभ्यो भयं कि
ञ्चित्प्राप्नुयान्मानवः क्वचित् न च मारीभयं
तस्य ग्रहरोगभयं तथा पातकानां भयं नै
व यः पठेत्स्तोत्रमुत्तमम् बंधने च महाघो
रे पठेत्स्तोत्रमनन्यधीः सर्वं प्रशममायाति
भयं भैरवकीर्तनात् एकादशसहस्रं तु
रश्चरणमुच्यते यस्त्रिसंध्यं पठेन्नित्यं संव

श्रा. ५

त्सरमतंद्रितः सर्वसिद्धिंप्राप्नुयादिष्टांदुर्ल
भामपिमानवैः षान्मासंभुविकामस्त्वज
पितंप्राप्नुयान्महीं राजशत्रुविनाशार्थंप
ठेन्मासाष्टकेबुधः (तथा) राज्ञोवारत्रयंमन्त्रीराज्ञा
नेवशमानयेत् धनार्थीचसुतार्थीचदा
रार्थीचापिमानवः पठेन्मासत्रयंदेविवा
रमेकंतथानिशि धनंपुत्रंतथादारान्प्रा
प्नुयान्नात्रसंशयः रोगीरोगात्प्रमुच्येतब
द्धोमुच्येतबन्धनात् भवत्यरोगोद्युतिमान्

बहुरूपगुणान्वितः भीतो भयात्प्रमुच्येत
देवि सत्यं न संशयः निगडै [illegible]
कारागृहनिपातितः शृंखलाबंधने प्राप्तः
पठेद्देवदिवानिशि योमान्समीप्सते का
मान्स्तांस्तान्प्राप्नोत्यसंशयं अप्रकाश्यमप
रं गुह्यं न देयं यस्य कस्यचित् सत्कुलीना
य शांताय [illegible] दद्यात्स्तोत्रमि
दं पुण्यं सर्वकामफलप्रदं भैरवश्च ब्रह्म
ह्यो भूत्स्वयं च महेश्वरः एवं श्रुत्वा ततो दे

श्चापि वध्यमा

कगुरुभक्ताय
शीलगु

श्री-
१०

विनामाष्टशतमुत्तमम् संतोषेपरमेश्री
प्यमैरवस्यमहात्मनः लज्जयापरयाभ
क्त्यासदासर्वेश्वरेश्वरी श्रात्मवर्णसमोपे
तेसमभमेयसमन्विते तोजपन्समनतेहृष्टः
सर्वान्कामानवाप्नुयात् फणिधरफणि
नाथोदेवदेवाधिनाथः क्षितिधरक्षिना
थोवीरवेतालनाथः निधिपतिनिधिना
थोयोगिनीयोगनाथो जयतिवटुकनाथः
सिद्धिदःसाधकानाम् श्रीनीलकंठतलवि

विक्रविशालमौलिं नेत्रप्रकाशितमनोज्ञ
मुखारविंदं कल्याणकीर्त्तिकमनीयकण
लपाणिं वंदामहे वटुकनाथमभीष्टसिद्ध
म् ९१ इतिश्रीरुद्रयामलेतंत्रे विश्वसारोद्धा
रे उमामहेश्वरसंवादे आपदुद्धारकोनाम
भैरवाष्टकशतकं स्तोत्रं संपूर्णं समाप्तं शु
भंभूयात्